वर्त्तितोऽयं व्यवहारइति शतकृत्वस्त्वयोच्यमानेऽपि नास्मा-कमादरः। अन्यथाभ्युपगम्य प्रमाणादीनि भवता प्रवर्त्ति-तोऽयं व्यवहार इत्येतावता भवदीयो व्यवहाराभास इत्य-स्माभिरपि वक्तुं शक्यतएव। ननु यदि प्रमाणादीनि न सन्ति व्यवहारएव धर्म्मी कथं सिद्ध्येत् दूषणादिव्यव-स्था वा कथं स्यात् सर्व्वविधिनिषेधानां प्रमाणाधीन-त्वात्। मैवम्। न ब्रूमोवयं न सन्ति प्रमाणादीनीति, स्वीकृत्य कथारभ्येति। किन्नाम सन्ति न सन्ति वा प्रमा-णादीनीत्यस्यां चिन्तायामुदासीनैर्यथा स्वीकृत्य तानि भ-वता व्यवह्रियते तथा व्यवहारिभिरेव कथा प्रवर्त्त्यता-मिति। अन्यथा न सन्ति प्रमाणादीनीति मतमस्माकमा-रोप्य यदिदम्भवता दूषणमुक्तं तदपि न वक्तुं शक्यं कीदृशीं मर्य्यादामालम्ब्य प्रवर्त्तितायां कथायां दूषण-मुक्तं किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां वादिभ्यां प्रवर्त्तितायां कथायाम् उतासत्त्वमभ्युपेत्य अथैकेन सत्त्व-मपरेण चासत्त्वमङ्गीकृत्य। न तावदाद्यः अभ्युपगत प्रमा-णादिसत्त्वं प्रति तादृक्पर्य्यनुयोगानवकाशात्। द्वितीये तु स्वतो-ऽप्यापत्तेः न तृतीयः तथैव कथान्तरस्य प्रसक्तेः उभयाभ्यु-पगमानुरोधित्वाच्च कथानियमस्य। अन्यथा स्वाभिप्रायमा-लम्ब्य तेनापि तद्वचसि यत्किञ्चिद्वागात्मनि दूषणेऽभिहिते कस्य जयो व्यवतिष्ठताम् प्रमाणाद्यभ्युपगन्तुरेव यावन्नियम-भरयन्त्रणा महती स्यात्। तस्मात् प्रमाणादिसत्त्वासत्त्वा-भ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा कथायां प्रवर्त्तितायां भवतेदं दूषणमुक्तं युक्तमेव तथा सति स्यात्। योऽयं भवान् स्वाभिप्रायमपि नावधारयितुं शक्तोऽतिदू-रतस्तस्मिन् पराभिसन्धानावधारणप्रत्याशा। अथ वादी-कृत्य दुर्वैतण्डिकं तस्मिन् बाधोऽभिधीयत इत्येव नेष्यते शिष्यादयस्तु तस्य कथानधिकारं ज्ञायन्ते अतएव भाष्य-कारः "सप्रयोजनमनुयुक्तो यदि प्रतिपद्यत" इत्याहस्म न तु प्रतिपद्यस इति। मैवम् शिष्यादीन् प्रत्यपि चार्व्वाका-देर्दोषोऽयमित्येवाभिधातव्यम्। कथञ्च तथा स्यात् तस्य कथाप्रवेशाप्रवेशयोस्तद्दाधाक्षमत्वात्कथायामेव हि निग्रहः। नापि द्वितीयः तथाहि स्वादयेवं यदि कथकप्रवर्त्तनीय-वाग्व्यवहारं प्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युप-गमे निवर्त्तेत नचैवं सम्भवति तथा सति तत्सत्त्वानभ्युप-गन्तॄणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत हेत्वनुपपत्तेः। उक्तञ्चायमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपाप-लापो न शक्यत इति। अथ मन्यसे कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाच्चाभ्युपगमः यत्सत्तदभ्युपगम्यतइति स्थितेरिति। मैवम्। कयापि निय-मस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतु-त्वात् प्रमाणादीनां सत्त्वं सत्त्वाच्चाभ्युपगमो भवता प्रसाध्यः। कथनात्पूर्व्वं तत्तत्त्वावधारणं वा परपराजयं वा अभि-लषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्य्य-वस्यति तावदनुरोद्धव्यम् तच्च व्यवहारनियमस्यानुबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यतइति व्यवहारनियमसमयमेव बध्नीतः स च प्रमाणेन तर्केण च व्यवहर्त्तव्योवादिना प्रतिवादिनापि कथाङ्गतत्त्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहा-न्याद्यन्यतमनिग्रहस्थानं तस्य दर्शनीयम् तद्व्युत्पादने प्रथमस्य भङ्गोव्यवहर्त्तव्योऽन्यथा द्वितीयस्यैव। तादृशेतरौ च जैत्रतया व्यवहर्त्तव्यौ प्रामाणिकपत्रस्थान्विकतया व्यवहर्त्तव्य इत्यादिरूपः। अतएवं व्यवहारनियमबन्धेऽपि हेतुर्वक्तव्यः तथा च सोऽपि हेतुः कथायां प्रवृत्तायामभिधातुं युक्तइति प्र-माणसत्त्वाभ्युपगमहेत्वभिधानवत् प्रत्यवस्थानमनवकाशम्। द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्था-जयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परिगृहीतत्वात् नचैवं प्रमाणानुपपत्तस्वेच्छामात्रपरिगृहीतमूलत्वान्मूलापरि-शुद्धिसम्भवेन सर्व्वविचारविचार्य्यतत्फलविप्लवापत्तिः स्यात्। अविद्याविद्यमानानादिपारम्पर्य्यायातस्य लोकव्युत्पत्तिगृ-हीतस्य वादस्य च तस्यान्यथाभावासम्भाव्यतालक्षणस्ततःसि-द्धिशुद्धत्वात्। नच प्रमाणादीनां सत्तापीत्यमेव ताभ्यामङ्गी-कर्त्तुमुचिता। तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युप-पत्तेः प्रमाणादिसत्तामभ्युपेत्यापि तथा व्यवहारनियम-व्यतिरिक्तकथाप्रवृत्तिं विना तत्त्वनिर्णयस्य जयस्य वाभि-लषितस्य कथकयोर्विपर्य्यवसानात्। नापि तृतीयः लोक-व्यवहारो हि प्रामाणिकव्यवहारो वा स्यात् पामरादिसा-धारणव्यवहारो वा। नाद्यः। विचारप्रवृत्तिमन्तरेण तस्य दुर्निरूपत्वात् तदर्थमेव च पूर्व्वं नियमस्य गवेषणात्। नापि द्वितीयः शरीरात्मतादीनामपि तथा सति भवता स्वीकर्त्तव्यतापातात्। पश्चात्तद्विचारबाध्यतया नाभ्युपेय-तइति चेत् तर्हि प्रमाणादयोऽपि यदि विचारबाध्या भवि-ष्यन्ति तदा नाभ्युपेया एव अन्यथा तूपगन्तव्या इति लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यत इति तावन्न भवति। नापि चतुर्थः यादृशोभवता प्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायामालम्ब्यते। तस्यैव प्रमाणादि-सत्त्वासत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात्। तस्य